काम + चर + णिनिः ।) कामुकः । (यथा
"पुरन्दरं च जानीते परस्त्रीकामचारिणम्" ॥
इति महाभारतम् ॥) स्वच्छन्दः ॥ कलविङ्कः । इति मेदिनी ॥

कामचारी, [न्] पुं, (कामेन इच्छानुसारेण चरति विहरति । काम + चर + णिनिः ।) गरुडः । इति शब्दरत्नावली ॥

कामजानः, पुं, (कामं जनयति कुहुध्वनिना । काम + जन + णिच् + अच् । निपातनात् न ह्रस्वः । यद्वा कामजं कन्दर्पभावं आनयति । कामज + आ + नी + ड ।) कोकिलः । इति शब्दरत्नावली ॥ कामजनि इति च पाठः ॥

कामतालः, पुं, (कामं तालयति प्रतिष्ठापयति । काम + तलप्रतिष्ठायां + णिच् + अण् ।) कोकिलः । इति त्रिकाण्डशेषः ॥

कामदः, त्रि, (कामं अभिलाषं ददाति । काम + दा + कः ।) कामदाता । अभिलाषदः । इति मेदिनी ॥
(यथा हे : रामायणे २ । ३३ । ७ ।
"ऐश्वर्य्यस्य रसज्ञः सन् कामानाञ्चैव कामदः" ॥
कामं कामस्य रूपं स्वसौन्दर्य्येण द्यति अवखण्डयतीति । यद्वा कामं मदनं द्यति नाशयतीति । ऊर्द्ध्वरेतस्त्वादस्य तथात्वम् । काम + दो + कः । कार्त्तिकेयः । यथा, महाभारते ३ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यवाग्भुवनेश्वरः" ॥)

कामदा, स्त्री, (कामं अभीष्टं ददाति या । काम + दा + कः + टाप् ।) कामधेनुः । इति मेदिनी ॥

कामदुघा, स्त्री, (कामं दोग्धि । काम + दुह + "इगुपधज्ञाप्रीकिरः कः" । ३ । १ । १३५ । इति कः । ततष्टाप् ।) कामधेनुः । इति मुग्धबोधव्याकरणम् ॥ (यथा, भागवते १ । १० । ४ ।
"कामं ववर्ष पर्जन्यः सर्व्वकामदुघा मही" ॥)

कामदूतिका, स्त्री, (कामस्य उद्दीपकत्वात् दूतिकेव ।) नागदन्तीवृक्षः । इति रत्नमाला ॥

कामदूती, स्त्री, (कामस्य दूतीव कामोद्दीपकत्वात् ।) पाटलावृक्षः । इति शब्दरत्नावली ॥

कामधरः, पुं, (कामरूपं कामस्य संज्ञां वा धरति धारयति वा । काम + धृ + अच् ।) कामरूपस्थ मत्स्यध्वजपर्व्वतस्थसरोवरः । यथा,—
"मणिकूटाचलात् पूर्व्वं मत्स्यध्वजकुलाचलः ।
निर्द्दग्धो यत्र मदनो हरनेत्राग्निना पुनः ॥
शरीरं प्राप्य तपसा समाराध्य वृषध्वजम् ।
तत्र मत्स्यस्वरूपस्तु कामदेवेन संस्थितः ॥
अधिकायां पृथिव्यां वीक्ष्यमाणः समन्ततः ।
तदा तु शाश्वती नाम तत्रास्ते दक्षिणस्रवा ॥
सरः कामधरो नाम तस्मिन् शैले व्यवस्थितः ।
शाश्वत्यां विधिवत् स्नात्वा पीत्वा कामधराम्भसि ॥
विमुक्तपापः शुद्धात्मा शिवलोके महीयते" ॥
इति श्रीकालिकापुराणे ८१ अध्यायः ॥

कामधेनुः, स्त्री, (कामप्रतिपादिका धेनुः ।) स्वनामख्यातगौः । तस्या उत्पत्तिर्यथा,—
"दक्षस्य तनया याभूत् सुरभिर्नाम नामतः ।
गवां माता महाभागा सर्व्वलोकोपकारिणी" ॥
तस्यान्तु तनया जज्ञे काश्यपात्तु प्रजापतेः ।
नाम्ना सा रोहिणी शुभ्रा सर्व्वकामदुघा नृणाम् ॥
तस्यां जज्ञे शूरसेनाद्दशोरतितपोज्ज्वलात् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता" ॥
"तस्यां जज्ञे शुनःशेफान्मुनेरतितमोज्ज्वलात्" ।
इति पुस्तकान्तरे पाठः ॥
"सा सिताभ्रप्रतीकाशा चतुर्व्वेदचतुष्पदा ।
स्तनैश्चतुर्भिर्धर्म्मार्थकामाप्रसवकारिणी" ॥ * ॥
तस्या गर्भे शिववाहनवृषोत्पत्तिर्यथा,—
"सा स्वयम्भुशरीरात्तु कालेन महता सती ।
निर्म्मलं यौवनं कामधेनुराप मनोहरम् ॥
तां चरन्तीं मेरुपृष्ठे चारुरूपां मनोहराम् ।
ददर्श स तु वेतालः कामुकश्चाभ्यपद्यत ॥
तं कामुकन्तु वेतालं विदित्वा कामधेनुका ।
पशुधर्म्मात् स्वयं भेजे तं पुत्रं शशिशेखरः ॥
सोऽवाप तस्यां परममामोदं शङ्करात्मजः ।
सा चापि परमं तस्मिन् मदनात् प्रतिहर्षिता ॥
तयोः प्रवृत्ते सुरते तस्या गर्भोऽभवत्तदा ।
काले प्राप्ते तु सुसुवे कामधेनुर्म्महावृषम् ॥
सोऽचिरेणैव कालेन सुमहान् वृषभोऽभवत् ।
महाककुदसंयुक्तश्चारुशृङ्गद्वयान्वितः ॥
उत्क्षिप्तविचलत्कर्णयुगलो दीर्घवालधिः ।
ककुदेन च शृङ्गाभ्यां कर्णाभ्यां स सिताभ्रवत् ॥
विचरन् ददृशे देवैः शृङ्गैरिव हिमाचलः ।
वेतालस्त्वकरोत्तस्य नाम भृङ्ग इति द्विजाः ! ॥
स तु भृङ्गो ज्ञानशाली समाराधयदीश्वरम् ।
सोऽपि तुष्टो वरं तस्मै ददाविष्टं महेश्वरः ॥
तमेव वाहनं चक्रे कृत्वा देवतनुं वृषम् ।
स चिरायुश्च बलवान् पृथिवीधरसत्तमः ॥
भृङ्गो नाम महातेजाः केतुश्चाप्यभवत् पतेः ।
भृङ्गोऽभूद्वाहनो यस्माच्छङ्करस्य महावृषः ॥
अतो भृङ्गिरिति ख्यातिं स च प्राप महेश्वरात्" ॥
इति श्रीकालिकापुराणे ९१ अध्यायः ॥ * ॥
अभीष्टप्रदा धेनुः । तद्दानफलं यथा,—
"वर्णो हरिः सर्व्व एव पवित्र-
स्तत्रापि वर्णे शरदेव शुद्धा ।
तस्यां शुभः कार्त्तिको नाम मास-
स्तत्रापि पुण्यो हि बभूव दर्शः ॥
यस्यां हरेर्दैत्यभयाद्विमुक्ता
उरःस्थलं प्राप्य सुखं सुशेते ।
लक्ष्मीः पुराद्यापि विनिर्म्मिता वै
कामप्रदा धेनव एव यत्र ॥
अहर्मुखे यत्र दिने समस्ताः
सुधेनवो भूमितले भ्रमन्ति ।
गृहे न यस्मिन् कथयन्ति कीर्त्तिं
हानिः क्षयस्तत्र च प्रत्ययो मे ॥
तस्मात्त्वमत्रैव च कामधेनुं
दद्याः समुद्दिश्य तु केशवस्य ।
विप्राय वै सर्व्वगुणोपपन्नां
कृत्वा व्रतं लक्ष्मतो हरेस्तु ॥
सम्यक् प्रदत्तैस्तु गवां सहस्रैः
सवत्सवस्त्रैः सहितैश्च हेम्ना ।
काले फलं यल्लभते मनुष्यो
न कामधेनोश्च समं द्विजेभ्यः ॥
कन्यारथानां करिवाजियुक्तैः
शतैः सहस्रैः सततं द्विजेभ्यः ।
दत्तैः फलं यल्लभते मनुष्यः
समं तथा स्यान्नतु कामधेनोः" ॥ * ॥
तद्भेदाः तद्दानविधिश्च यथा,—
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा
निर्गता मथ्यमानेऽब्धौ उषःस्नानं शुभप्रदम् ॥
तत्र स्नात्वा समभ्यर्च्य धेनुं पूज्य प्रयत्नतः ।
गोदानफलमाप्नोति नरो विगतकल्मषः ॥
एकादशीमुपोष्याथ नरो दिनचतुष्टयम् ।
घृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा ॥
नक्ताशी गोरसैर्द्रव्यैः पूजयेन्मधुसूदनम् ।
गन्धपुष्पैः सुनैवेद्यैर्वस्त्राभरणकुण्डलैः ॥
शङ्खासिचक्रोद्यतबाहुविष्णो-
र्गदाब्जहस्तस्य तु शार्ङ्गपाणेः ।
अर्घं प्रयच्छामि जनार्द्दनस्य
श्रिया युतस्यापि धराधरस्य ॥
श्रियः पतिं श्रीधरमेव कान्तं
श्रियाः सखायं हि श्रियोऽधिमूलम् ।
नमाम्यहं श्रीधरं श्रीनिवासं
समर्च्चितो मे प्रददातु कामान् ॥
एवं पूज्य विधानेन श्रिया युक्तैस्तु नामभिः ।
पृथक् जागरणं कुर्य्यात् श्रिया सार्द्धं जगत्पतेः ॥
या देवी भार्गवं भेजे कुलं सर्व्वत्र पूजिता ।
आयातु सा गृहं नन्दा सुप्रीता वरदा मम ॥
याङ्गिरसञ्च सा देवी सुनन्दा प्रत्युपस्थिता ।
आयातु मे गृहे सा तु सुप्रीता वरदा सती ॥
सुरभी या भरद्वाजं कामधेनुः सुकामदा ।
सदाभवद्गृहं साच ममायातु सुरार्च्चिता ॥
सुशीला काश्यपं या तु भेजे सर्व्वत्र कामदा ।
सा मे भवतु सुप्रीता कामधेनुर्गृहे सदा ॥
सुमना या वशिष्ठन्तु संप्राप्य मुमुदे शुभा ।
सा मे गृहं सदायातु कामदा देवपूजिता ॥
एवं पूज्य विधानेन प्रभाते विमले शुभे ।
शुक्लाम्बरधरः स्नातः शुक्लमाल्यानुलेपनः ॥
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनसुसंस्तृते ॥
तिलप्रस्थेन चाकीर्णे चतुःस्वर्णविभूषिते ।
क्षौमवस्त्रान्विते शुभ्रे मध्वाज्यपात्रसंयुते ॥
शुभवस्त्रैः समाहृत्य सर्व्वरत्नैरलङ्कृताम् ।
सुवर्णशृङ्गीं सुखुरां चतुःस्वर्णां मनोरमाम् ॥
क्षीराब्धिपयसोपेतां धेनुं मन्त्रैः प्रपूजयेत् ।
या धेनुः सर्व्वदेवानां ऋषीणां भावितात्मनाम् ॥
क्षीराब्धेर्निर्गता या च सा मे भवतु सुस्थिरा ।
घृतक्षीराभिषेकञ्च कृत्वा विष्णोः प्रयत्नतः ॥
समभ्यर्च्य यथान्यायं गन्धपुष्पादिभिः क्रमात् ।
गावो ममाग्रतः सन्तु गावः पार्श्वे च पृष्ठतः ॥
गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम् ।
प्राङ्मुखोदङ्मुखो वापि सितयज्ञोपवीतिनीम् ॥
इमां त्वं प्रतिगृह्णीष्व देवदेव ! जगत्पते ! ।